National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 84-88
© 2026 NJHSR
www.sanskritarticle.com

**कुमारी शीतला**
शोधच्छात्रा, दर्शनविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**डॉ.जि.नरसिम्हुलु**
सहायकाचार्यः, दर्शनविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**Correspondence:**
**कुमारी शीतला**
शोधच्छात्रा, दर्शनविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

# जनजातीयानामुत्थाने आदिवासिमहापुरुषस्य श्रीरामेश्वरस्य शैक्षिकमाध्यात्मिकयोगदानम्

**कुमारी शीतला, डॉ.जि.नरसिम्हुलु**

**सारांशः -** छत्तीसगढस्य पावनधरा आदिकालादेव उर्वरास्ति । धरेयं त्रेतायुगे दण्डकारण्यम् इति नाम्ना ख्याता । द्वापरयुगे च वीरबभ्रुवाहनस्य यशोभूमिरासीत् इयं धरा । भूप्रदेशोऽयं महात्मबुध्दमपि समाकर्षयत् । विश्वविश्रुतः दार्शनिकः रसायनशास्त्रज्ञः च आचार्यः नागार्जुनोऽपि अत्रैव जन्म अलभत । एकोनविंशतितमायाः शताब्द्याः उत्तरार्द्धे विंशतिशताब्द्याः पूर्वार्द्धे चास्यां धरायां आध्यात्म-धर्म-संस्कृति-शिक्षा-समाजसुधार-राजनीति-प्रशासन-विज्ञानादिक्षेत्रेषु श्रेष्ठाः महापुरूषाः अभवन्। तत्र रामेश्वरः जन्मनः एव प्रतिभाशाली अनितरसाधारणश्चासीत्। अयं वनवासी-समाजे व्याप्तानाम् अशिक्षु-ताऽसुचिताऽन्यायशोषणपशुबल्यादीनाम् अवैज्ञानिकविचारधाराणां कुरीतीनां धार्मिकान्धविश्वासानां च विरोधमकरोत्। प्रस्तुते शोधपत्रेऽस्मिन् जनजातीयानामुत्थानं, आदिवासिमहापुरुषस्यास्य परिचयपुरस्सरं कथमयं जनजातीयनामुत्थाने परिश्रममकरोत्, जनजातीयजनेषु आध्यात्मिकशिक्षां कथं नीतवान् , जनजागरणं कथं कृतवान् , जनजातीयजनानाम् उन्नयनाय तस्य शैक्षिकयोगदानं कीदृशमासीत् इत्यादयः विषयाः अत्र सम्यक् विचार्यन्ते ।

**कूटशब्दाः -** जनजातीयोत्थानम्, आदिवासिमहापुरुषः गहिरागुरुः, शिक्षा, आध्यात्मम्, धर्मः, संस्कृतिः, विकासः, अशिक्षुता, अशुचिता, अन्यायः, शोषणम्, पशुबलिः, अवैज्ञानिकता, विचारधारा, कुरीतयः, धार्मिकान्धविश्वासः, तपः, सत्यज्ञानम् , वनवासिजनचेतना इत्यादयः ।

**प्रस्तावना-** भारतीयज्ञानपरम्परामाश्रित्यैव भारतीयमनीषिणाम् आचारविचारव्यवहारदयः परिलक्षिताः भवन्ति । उत्तममाचरणं, श्रमः त्यागश्चेति गुणाः मनुजस्य व्यक्तित्वं प्रकाशयन्ति । महापुरुषाणां जन्म कस्मिंश्चिदपि धर्मे, समुदाये वर्णे वा भवतु तेषां कार्यं सम्पूर्णसमाजाय भवति । छत्तीसगढस्य रायगढ, सरगुजा, जशपुर इत्येतानि मण्डलानि वनवासि-बहूलाञ्चलानि। यत्र गोंड, कवंर, नगेशिया, उंराव, कोरवा, पण्डो इत्यादयः: जनजातीयजनाः निवसन्ति। कंवरजातौ लब्धजन्मानः श्रीरामेश्वरस्य व्यक्तित्वं कृतित्वं च स्तुत्यमनुकरणीयं चास्ति। छत्तीसगढस्य विभूतिरूपेण तेन जनजातीयेषु नवजागरणं चेतनामानीय तेभ्यः प्रेरणां प्रदाय समाजोद्धाराय कार्यमकरोत्। श्रीरामेश्वरः वनवासिनां मध्ये न केवलं चेतनाविकासयोः प्रतीकः अपि तु तेषाम् उद्धारकोऽपि वर्तते। अत एव दार्शनिक-सामाजिक-परिपक्वतोपलब्धयः आदिवासिसमाजे अद्यापि स्थिराः जीवन्त्यः वर्तन्ते। महापुरुषोऽयं स्वमनोगतान् विविधभावानुद्दिश्य गहनं चिन्तनं करोति स्म । सत्पुरुषाणां दर्शनेन स्वकीयजिज्ञासाः तेषां पुरतः उपस्थापयति स्म। ततः समाधानानि प्राप्य स्वपरितः विद्यमानानां जनानां परिवर्तनाय क्षेत्रीयभाषायां तेभ्यः उपदेशं प्रयच्छति स्म । श्रीरामेश्वरः महान् समाजोद्धारकः तपस्वी दार्शनिकश्च आसीत् । अनेनैव कारणेन जगद्गुरुः श्रीशंकराचार्यः स्वामी सत्यमित्रानन्दः एनम् 'अभिनवऋषिः' इतिनाम्ना सम्बोधितवान्[1]।

**सन्तगहिरागुरुरामेश्वरस्य वैयक्तिकपरिचय:-**

**जन्मनः पूर्वघटना –** द्वापरयुगे महाभारतयुद्धानन्तरं गान्धार्याः श्रापकारणेन कलियुगस्यान्तिमचरणे धर्मस्य रक्षानिमित्तं गहनारण्ये गहिराग्रामे रामेश्वरस्य जन्म अभवत् । श्रीरामेश्वरस्य जन्मघटना अलौकिकी वर्तते। रामेश्वरस्य जन्मन: द्वित्रिमासेभ्यः पूर्वं एक: साधुपुरुष: तद्ग्राममागतः। स: विलक्षणप्रतिभासम्पन्न: आसीत् । स: साधुपुरुषः तस्य पितरौ उक्तवान् यद् 'युवयो: गृहे महापुरुषस्य जन्म भविष्यति। स: सनातनधर्मस्य रक्षक: भविष्यति। अयं बालक: सामान्य: इति न चिन्तनीय:' एतावदुक्त्वा सः तिरोहित:। सन्तस्य वाणी सत्याऽभूत्। एतद् सर्वविदितमस्ति यत् रामेश्वरः बाल्यकालादेव अलौकिकप्रतिभासम्पन्न:आसीदिति[2]। श्रीरामेश्वस्य पिता बुडगीरामकंवर-पैकरा माता च सुमित्रा बाई आसीत्। तस्य ग्रामस्य पूर्वनाम सारस्माक इति आसीत् । मातु: ग्राम: केसला इति चासीत्।

**जन्म -** मध्यप्रदेशे रेवाखण्डस्य पूर्वभागे रायगढ मण्डलम् आसीत्, यत् सम्प्रति प्राचीनमहाकौशलप्रदेशस्य वर्तमानछत्तीसगढक्षेत्रे विद्यते। अस्य मण्डलस्य प्रखण्ड: लैलुंगात: पञ्चदश किलोमीटरदूरे उत्कलप्रान्तस्य सीमावर्तिप्रदेशे गहिरा इति ग्राम: स्थित: वर्तते। रामेश्वरस्य जन्म भीषणवृष्टौ श्रावणमासस्य अमावस्यायां तिथौ 1905 तमे वर्षे 12 द्वादशवादने आदिवासी वनवासी कंवर (पैंकरा) जातौ अभवत्। तस्य पूर्णनाम रामेश्वर: इति आसीत्। किन्तु गहिराग्रामे जन्मजात: इति कारणेन अग्रे गहिरा गुरूजी इति नाम्नाऽयं विख्यात: जात:।

**पितरौ बान्धवाश्च –** रामेश्वर: कँवर इत्यस्य पितुर्नाम बुडगी कँवर मातुर्नाम सुमित्रा चासीत्। तस्य पिता सम्पन्न: कृषक: ग्रामप्रधानश्चासीत्। त्रिषु भ्रातृषु रामेश्वर: मध्यम: पुत्र: आसीत् । ज्येष्ठ: पुत्र: चक्रधर: कनिष्ठश्च धनेश्वर: आसीत् ।

**पूर्वज: -** रामेश्वरस्य पूर्वजा: ओडिशात: मनारविकासखण्डस्य खेरबहार इति ग्रामं प्रति आगता: आसन् । एतस्य पूर्वजानां समीपे पर्याप्तं पशुधनमासीत्। पशुभ्य:पर्याप्तानुकूलपरिस्थित्यभावात् भ्रमन्त: ते गहिराग्रामं प्रति आगताः । गहिराग्रामे अनुकूलपरिस्थितिं प्राप्य अत्रैव न्यवसन्[3] ।

**गोत्रम् –** रामेश्वरस्य जन्म वनवासी कँवर इति परिवारे अभवत्। कँवर इत्यस्य सम्बन्ध: महाभारतस्य कुरुवंशेन सह वर्तते इति मन्यन्ते। कँवरसमाजस्य उत्पत्तिविषये एवमुच्यते यत् चन्द्रवंशी **कुरूत: कौरव: कौरवाच्च कँवर इति सम्बोधित:।** कँवरेति समाज: उत्तमकुलक्षत्रियवंशस्यास्ति (श्री चन्द्रवंश पृष्ठक्रमांक: 9) । चन्द्रवंशे पंचविंशति गोत्राणामुल्लेख: कृत:, तेष्वेकम् 'अत्रि' गोत्रम्। एतत्गोत्रीया एव कँवरवंशजा इति कथ्यते ।

**अत्रिगोत्रस्य कुलदेवी जगदम्बा, विजयदशम्यां खड्गस्य पूजनस्य प्राचीनं विधानं प्रचलितं वर्तते[4] ।**

**आध्यात्मधर्म: -** रामेश्वरस्य प्रत्येकमपि कार्यं श्रेष्ठतममासीत्। आध्यात्मसाधनामार्गे तस्य चरणौ अग्रे सरन्तौ आस्ताम् । तस्य जीवनम् अन्तर्मुखतया आसीत् । आस्तिक्यबुद्धिमतः अस्य स्वच्छतां अनुशासनं नियमितरूपेण तुलसीपूजनं अर्घ्यप्रदानं चेति सत्कर्माणि दृष्ट्वा जना: दूरं तिष्ठन्ति स्म । पितरौ तस्य व्यवहारेण भयभीतौ भवत: स्म। रामेश्वरस्य बोचकु, लांजा, आसाराम इति मित्रत्रयमासीत् । रामेश्वर: स्वमित्रैस्सह सन्धेरागुहां प्रति गतवान् तत्र स्थित्वा पंचदशदिवसानि यावत् साधनां कृतवान् । यदा स: साधनारत आसीत्, तदा गुहां परित: सिंहव्याघ्रसर्पादय: अटन्ति स्म। आसारामबोचकौ भयभीतौ भूत्वा निगूढौ आस्ताम् । एवमेव रामेश्वरस्य नित्यक्रम: आसीत् । कथ्यते यत् – पंचदशतमे दिवसे तत्र 'सप्तर्षय: मात्रा अरुन्धत्या सह दर्शनं कारयितुमागता:' तै: सह रामेश्वरेण चर्चापि कृता । तदानीं तस्य स्वरूपं दिव्यमद्भुतं चासीत्। आसारामबोचकौ तत्स्वरूपं द्रष्टुं न शक्तवन्तौ। तत: बोचकु: धावन्ग्रामं प्रत्यागत: सन् सर्वं वृत्तान्तं च ग्रामवासिभ्य: श्रावितवान् यत् रामेश्वरस्य मुखम् अत्यन्तं तेजोमयम् असीदिति। सर्वे यथा श्रुतवन्तः तदनुरूपमेव रामेश्वरस्य व्यक्तित्वं साक्षात्कृतवन्तः। 'आत्मैव इदं सर्वं जगत्' इत्यस्य बोध: तस्य व्यवहारे दृष्टिगोचरः भवति स्म।[5] । श्रुति- स्मृति-उपनिषत्स्वपि ब्रह्मविषयकं चिन्तनं कृतम्। तत्र श्रीमज्जगद्गुरुशङ्कराचार्येणोक्तं ब्रह्मज्ञानावलीमालायाम् - "ब्रह्म सत्यं जगन्मिथ्या"[6] इति।

**लोकशिक्षा-** प्राक्कालादेव सामाजोद्धारस्य जनान्दोलने तत्कालीन-सन्तानां महात्मनां विशिष्टा भूमिका आसीदेव। समाजोद्धरणं आरम्भत: एव नैरन्तर्येण जायमानमासीत्। तथापि समाजे विसंगतय: दोषाश्च भवन्त्येव। अस्यां परिस्थितौ महापुरूषेषु श्रीरामेश्वरोऽपि एक: सन्त:, एतस्य सान्निध्यं सम्प्राप्य नैके जना: उपकृता: अभवन्। प्रायश: षट् वा सप्तदशाब्दात् पूर्वं छत्तीसगढ-झारखण्ड-उत्तरप्रदेशानां सीमावर्तिक्षेत्रेषु आदिवासिन: पशुवत् जीवनं यापयन्ति स्म। तदृशानां सुप्तचित्तानां जागरणम्, तेभ्यः व्यावहारिकज्ञानप्रदानम्, भारतीय-ज्ञानपरम्पराणां संस्काराणां परिचयकरणम्, भारतीयं गौरवपूर्णमतीतं प्रति समर्पणभावोद्भावनमित्येतानि उत्कृष्टानि कार्याणि रामेश्वरेण विहितानि। रामेश्वर: आदिवासीसमाजस्य कँवरजाते: जनः आसीत् । अत: आदिवासीनाम् आस्थाभि: संस्थाभि: व्यवस्थाभि: गुणदोषैश्च परिचित: आसीत् । तद्गतदोषनिवारणं तस्य मुख्यं लक्ष्यमासीत्[7] ।

**स्वच्छतायां बलम् -** आदिवासिनां स्वच्छतापूर्णमाचरणं नावलोक्यते स्म । वस्त्रं धारयितुमपि न जानन्ति स्म । ते स्वच्छन्दतापूर्णं जीवनं यापयन्ति स्म। पुरूषा: कौपीनं, महिला: शाटिकाश्च धरन्ति स्म। दश-द्वादशवर्षीयाः बालक-बालिका: निर्वस्त्रं विचरन्ति स्म । अस्य समाजस्य स्थिति: दयनीया सर्वत्र मलिनता चासीत्। सर्वप्रथमं स्वच्छताया: अभियानं चालयित्वा तेषां पुरत: स्वच्छतामहत्व-स्योदाहरणं प्रास्तौत्। प्रतिदिनं स्नानं कर्तव्यमेवेति रामेश्वरस्य

उपदेश आसीत्। रामेश्वरः साधनाधार्मिकसत्संगबलेन च सम्पूर्ण-रामचरितमानसस्य अध्ययनं कृत्वा आत्मसात् कृतवानासीत्[8]।

**आध्यात्मभक्त्योः प्रारम्भः -**

**आध्यात्मस्य स्वरूपम् –** रामेश्वरः एकस्मिन् दिने स्वकण्ठे मृदङ्गं स्वीकृत्य रामकृष्णयोः संकीर्तनं कुर्वन् ग्रामस्य वीथिषु परिभ्रमन् आसीत्। तदा ग्रामीणः तस्य भजनेन प्रभाविताः सन्तः श्रद्धाभक्तिपूर्वकं तस्यानुसरणं कृतवन्तः । भजनं गायन् मृदंगं वादयन् च वीथिषु यदा सः भ्रमणं कृतवान् तदा क्रमशः तस्य पृष्टे विशालसमूहरूपेण समागता आसन् । एषः क्रमः सार्धद्विदिवसं यावत् प्राचलत्। अनेन आध्यात्मिकवातावरणस्य निर्माणं जातम्। रामेश्वरस्य विविधस्वरूपस्य दर्शनं कृत्वा जनाः आश्चर्यान्विताः आसन्। तस्य भक्तिमयेन दैवीयप्रदर्शनेनाधिकाः प्रभाविताः सन्तः तस्मिन् ईश्वरत्वस्य दर्शनं कृतवन्तः। ततश्च बहवः जनाः तस्यानुयायिनः अभवन्। रामेश्वरेण रामचरितमानसस्य चौपाई दोहा इत्याद्याः तत्रत्यगीतनृत्यमाध्यमेन जनेषु प्रसारिताः। ग्रामवासिनः चौपाई दोहा इत्यादिभगवत्स्तुतीः मन्त्रवत् उच्चारयन्तः मन्त्रमुग्धो सन्तः गीतं गायन्तः नृत्यं च कुर्वन्तः समाधिस्थाः भवन्ति स्म। तेषां चक्षुषु श्रद्धाश्रवः भवन्ति स्म। साधना धार्मिकाचरणानि, रामलीलाः, सात्विकव्यवहाराः च रामेश्वरमेनं महापुरूषरूपेण संस्थापयन्[9]।

**भक्तिस्वरूपम् –** रामेश्वरस्य प्रेरणया जनैः रामायणस्य चौपाई माध्यमेन भगवतः संकीर्तनम् आरब्धम्। समाजे संकीर्तनं नाम लीला-भजनमेव। इदानीमपि रामेश्वरस्य भक्तानां गृहेषु लीला- भजनम् अभिन्नमङ्गमस्ति। संस्थायाः संचालितेषु आश्रमेषु नैकविधानुष्ठानेषु यज्ञेषु च नित्यसायंकालीनसत्संगे लीला-भजनम् आयोज्यते। किन्तु एतस्मात्पूर्वं जनाः मद्यपानं कृत्वा आरात्रम् करमा डमकच इत्यादीन् कुर्वन्ति स्म[10]।

**शैक्षिकयोगदानम्-**विद्यालयस्य शुभारम्भः - 1950 तमे वर्षे कैलाशगुहायां यज्ञस्य निश्चयः जातः किन्तु मुख्यरूपेण तद् विद्वत् सम्मेलनमासीत्। यज्ञेऽस्मिन् वाराणसीतः पण्डितवासुदेवद्विवेदीवर्यः, पं.जगन्नाथः ज्योतिषाचार्यः, रीवातः स्वामी ऋषीकुमारः, कल्याणश्रमतः जशपुरस्य केतकरगुरूवर्यः चैते सम्मिलिताः अभवन् । अस्मिन्नेव काले संस्कृतविद्यालयारम्भं कर्तुं निर्णयः अभवत् । सर्वैरपि समवेतभावेन निर्णयस्य स्वागतं कृतम्। दायित्वमस्य श्रीगणपतलालशर्मणे दत्तम्। एतद्विषये एव शर्ममहोदयेन रायगढस्य संस्कृतविदुषा व्याकरणाचार्येण श्रीशिवनाथमिश्रवर्येण सार्धं चर्चा विहिता ।

रामेश्वरस्य कार्यात् प्रभावितः सन् सः सहर्षं स्वीकर्तिं दत्तवान्। कैलाशगुहायाम् एकस्मिन् भवने मोरेश्वर राव केतकरवर्येण कार्यकर्तॄणां प्रशिक्षणस्य सत्रं स्वीकृतम् । तत्र श्री जगदेवरामः योगस्य प्रशिक्षकत्वेनासीत्। श्रीजनार्दनस्वामिना भक्तियोगस्य तथा च दक्षिणभारतीयविद्वान् रामदत्तचोडवरपुवर्यः संस्कृतज्ञः आसीत्। प्रशिक्षणमेतद् केतकरस्य मार्गदर्शने प्रचलितमासीत् । विद्यालयारम्भं कर्तुं प्रथमप्रयत्नेन पर्वतस्थ यादवानां बालकान् आनीतवन्तः केचन अम्बिकापुराच्च। विद्यालयस्य वेषभूषा शुभ्रधौतवस्त्रमासीत्। किन्तु आदिवासिबालकाः हिन्दीमुच्चारयितुमसमर्थाः आसन् तेषां कृते तु संस्कृतं दुष्करमेव तथापि तेषामुन्नतिमुद्दिश्य विद्यालयारम्भः अभवत्। तत्र छात्रावासस्य संचालनं व्ययश्च मुट्ठी चावलयोजनया प्राप्तान्नैः भवति स्म। छात्रावासः विद्यालयश्च आश्रमे आसीदिति कारणेन नियमितदिनचर्यायाः प्रारम्भार्थं श्रीरामेश्वरेण सह चर्चां विधाय गनपतलालशर्मा, पं.शिवनाथशास्त्री च बगीचा कल्याणआश्रमं गतवन्तौ। केतकरवर्येण सह विमर्शं कृत्वा प्रातःस्मरणरस्य शान्तिपाठस्य मातृभूमिवन्दनायाः पठनीयश्लोकानाञ्च समावेशः दिनर्यायाँ कृतः। अग्रे पाठशालायाः सम्बद्धतेत्यर्थं सनातनधर्म-संतसमाजस्य सचिवः श्रीजयनारायणः, सनातनहोता इत्येताभ्यां प्रयत्नः विहितः । श्रीवासुदेववर्यस्य माध्यमेन सम्बद्धतायाः प्रमाणपत्रं वाराणसीसंस्कृतविश्वविद्यालयतः प्राप्तम्। तत्र च "रामेश्वरगहिरा-गुरुसंस्कृतमहाविद्यालयः सामरवार" इति साक्षात् महाविद्यालयस्य सम्बद्धता प्राप्ता । प्रारम्भे तु प्राथमिकपाठशालायाः विचारः आसीत्, किन्तु अन्तिमलक्ष्यरूपेण महाविद्यालयोऽयं तेषां पुरतः आगतः। कदाचिदेतत् कार्यं पं.वासुदेवशर्ममहोदयस्यैव स्यात्। ततः परम् सामरवारे उच्चतरमाध्यमिकविद्यालयस्य महाविद्यालयस्य च प्रारम्भः अभवत्। तत्रत्याः सेवाभाविनः शिक्षकाः सर्वविधं गतिविधिं संचालयन्ति। संस्था द्वारा संचालितानां विद्यालयानां छात्रवासानां चाश्रमानुसारं विवरणानि इत्थं सन्ति – विद्यालयानां संख्या- 16, महाविद्यालयनां संख्या – 2, आश्रमाणां संख्या-19, छात्रवासानां संख्या- 17, मुख्याश्रमाणां संख्या 04 ।[11]

**उद्देश्यानि –**

1. भारतीससंस्कृत्यानुकूलक्षेत्रस्य आदिवासीबालकबालिकानां सर्वाङ्गीणविकासः, सामाजिकोत्थानाय च संस्थानानां निर्माणं संचालनञ्च ।
2. आदिवासीलोकसंस्कृतेः कलाकौशलस्य च भारतीयसंस्कृत्या तादात्म्यं संस्थाप्य तेषां विकासः ।
3. आदिवासीपरिवेशानुकूलम् आर्थिक-कृषि- औद्योगिकविकासस्य च सम्भावनानां शैक्षणिकयोजनायां योजयितुं कार्यक्रमनिर्माणम्।
4. व्यापकराष्ट्रियोद्देश्यनां पूर्तये सुयोग्यप्रबुद्धनागरिकानां निर्माणम्।
5. आदिवासिनामुपचारार्थं चिकित्सालयानां प्रारम्भः ।
6. अमरवाण्याः संस्कृतभाषायाः प्रचार-प्रसाराय संस्कृतविद्या-लयानां महाविद्यालयानां प्रारम्भः ।
7. समाजस्यापेक्षितस्य निर्धनवर्गस्य च छात्राणां साहाय्यम् ।
8. संस्थायाः सम्पत्तेः संरक्षणम् ।

9. समाजकल्याणस्य कार्यक्रमाणां क्रियान्वयनम् ।
10. सत्य-अहिंसा-शांति-दया-क्षमादिनां जनेषु- जनेषु प्रचार-प्रसारकरणञ्च।
11. प्राणीमात्रस्य कल्याणाय समाजात् मद्यमांसादिनामुपयोगात् दूरीकरणम् ।
12. नारीविकासकार्यक्रमाणां क्रियान्वयनम् ।
13. राष्ट्रियोद्देश्यस्य पूर्तये विश्वकल्याणार्थं पर्यावरणस्य शुद्ध्यर्थं वैचारिकशुद्ध्यर्थं च स्थानेषु-स्थानेषु उद्यानं, वृक्षारोपणं, वनसंरक्षणं, यज्ञादिकार्यक्रमाणां क्रियान्वयनम् ।
14. एतदतिरिच्य अन्यान्यपि कार्याणि काले-काले आवश्यकतानुसारं संचालितानि भविष्यन्ति ।

**विद्यालयस्य पंजीयनम् –**

आवर्षं महत: परिश्रमस्यानन्तरं 1985 तमे वर्षे सनातनसंतसमाजः, गहिरा समारबार पत्रालय:- दुर्गापारा, जशपुर रायगढ नाम्न: संस्थाया: पंजीयनम् अभवत् । विद्यालयस्य पंजीयनक्रमांक: 13379 दिनांक: 5 जनवरी 1985 तमे वर्षे हिन्दी विद्यालयस्य तथा च संस्कृत विद्यालयस्य च 10 +2 मान्यता प्राप्ता। एवम्प्रकारेण शासनस्य संस्थाया: च सहयोगेन सहस्रश: छात्र-छात्रा: आवासं, प्रकाशं, भोजनं, सुविधायुक्तां शिक्षां च प्राप्नुवन्ति । संस्थया संचालित: संस्कृतमहाविद्यालय: छत्तीसगढस्य महत्तम: महाविद्यालय:, यत्र शतप्रतिशतं आदिवासी छात्र- छात्रा: अध्ययनरता: सन्ति। यत्र शास्त्रीस्तरं यावत् अध्याप्यन्ते। अयं संस्कृतमहाविद्यालय: अत्र संस्कृताध्यापनेन सह आदर्शयुक्तानां नैतिकगुणानां विकास: छात्र-छात्रेषु करोति[13]।

रामेश्वर: कस्मिंचित् विद्यालये नाधीतवान्, किन्तु “स्वधर्मे निधनं श्रेय:”[14] इति तेषामध्यात्मिकसंस्कार: तद्प्रभावात् एव संस्कृति-सभ्यतयो: पतनं द्रष्टुं न शक्तवान्। वनवासीनामुत्थानाय देववाणी-संस्कृतज्ञानं आदिवासीनां कृते सुलभं भवतु इति भावनया प्रेरित: सन् शिक्षाजगति कार्यं कृतम् । वर्तमानकाले तत: निर्गता: छात्रा: हिन्दीसंस्कृतांग्लभाषासु कुशलाः सन्तः समाजस्य राष्ट्रस्य जीवने महतीं भूमिकां निर्वहन्ति । तत्रत्या: छात्रा: शास्त्री-आचार्यस्य उपाधिं सम्प्राप्य विविधकार्याणि कुर्वन्ति । एवं च तेषु अहङ्कारः न कदापि भवति । विविधा: समस्या: निराशा: अपमाननं उपहासं उपेक्षां च पराजयित्वा सहजतया संस्कृतिसभ्यताऽऽचरण-व्यवहारमर्यादादिषु स्वाभिमानभावाना पवित्रगंगारूपेण तेषु प्रवाहिता । शून्यात् सृष्टि: । स्वार्थरहितं ध्येयनिष्ठं जीवनमेव आदर्शं चरित्रसम्पन्नं च भवति । रामेश्वरं अवगुणा: स्पर्शमपि नाकुर्वन्। तेषां जीवने तु सौजन्यता, निर्भरता, अहंकारशून्यता, वाण्यां मृदुता, प्रत्येकपरिस्थितिषु क्षोभरहित: इत्यादय: गुणा: परिलक्ष्यन्ते स्म[15] ।

छत्तीसगढस्य पावनधरायां अनेकेषां आस्थावतां सन्तानां सन्तरामेश्वरस्य श्रेष्ठं स्थानं वर्तते। भारतीयसंस्कृतौ वशिष्ठ: गुरुरूपेण पूजित: तथैव संतमहात्मनां श्रृंखलायां रामेश्वर: वर्तमाने युगे स्मरणीय: सन्त: इति। यस्य जन्म समाजकल्याणाय अभवत्। आध्यात्मिकज्ञानश्रोत: चासीत्। रामेश्वरस्य आश्रमे अध्ययनरतानां छात्राणां पृथगेव अभिज्ञानं विद्यते। यच्च भविष्ये अपि स्वश्रेष्ठताबलेन सर्वोच्चस्थाने भविष्यति ।

**निष्कर्ष:** - धन्येयं भूमि: या सर्वदैव मानवानामुपकाराय अनेकेषां महापुरूषाणां जन्मदात्री वर्तते। तेषु रामेश्वर: अन्यतम: इति। छत्तीसगढस्य जशपुरक्षेत्रस्य आदिवासिनां जीवनं दशां च परिवर्त्य मानवगुणानां विकास: तेषु कृत:। शारीरिक-मानसिकस्वच्छताविषये जागरूकान् अकरोत्। पशुवत् जीवतां आदिवासिनां कृते स्वाध्यात्मबलेन सेवाभावेन च तेषामुपकाराय सनातनसंतसमाजस्य स्थापना कृता। प्रेम, भक्ति:, दया, करूणा आदिभि: सह परिचय: कारित:। धार्मिक-सांस्कृतिक-शैक्षिक-विकासाय आश्रमाणां मन्दिराणां निर्माणं, देववाणीसंस्कृतस्य प्रसाराय आदिवासिनां मध्ये संस्कृत-विद्यालयानां महाविद्यालयानां च स्थापना अभवत्। तेषु राष्ट्रिय-भावना: नैतिकमूल्यानि संस्कारा: च भवेयु: इति धिया समाजे अनेकेषां प्रवृत्तीनां संचालनं क्रियते । इत: लक्षश: जना: लाभान्विता:। ऋषय: खलु परोपकारिण: इति । रामेश्वर: महान् तपस्वी दार्शनिक: समाजसेवी चासीत् अतएव पूर्वजगद्गुरूशंकराचार्येण स्वामिसत्य-मित्रानन्देन अभिनवऋषि इति पदेन कीर्तित:। श्रीमद्भवद्गीतायां श्रीकृष्णेनोक्तम्-

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन: ।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।3।23।**

उत्तमै: जनै: यथा आचरणं व्यवहार: वा क्रियते। तद्वदेव अन्ये जना: अपि व्यवहरन्ति। यतोहि श्रेष्ठानां सदाचार: व्यवहारश्च समाजाय मार्गदर्शक: भवति। रामेश्वरस्याचारा: विचाराश्चानु-करणीया: एव। तेषां कार्यमविस्मणीयं लोकोत्तरं च विद्यते ।

**सन्दर्भग्रन्थसूची –**


1. वनाञ्चल का नंदादीप,विरचितः-सुनील किरवई, समता कालोनी, रायपुर (छ. ग.) प्रथमसंस्करणम् 2000
2. अभिनवऋषि गाहिरा गुरु रामेश्वर, विरचित:-शिवकुमार त्रिपाठी,प्रकाशक:-छत्तीसगराज्य हिन्दी ग्रन्थ अकादमीरायपुरम्, पी-3,पं रविशंकरशुक्लविश्वविद्यालय परिसर:, रायपुरम् 492010(छत्तीसगढ़म्)
3. जातिभास्करः विरचित: पण्डितज्वलाप्रसाद मिश्र:,प्रकाशक: आर्यावर्त संस्कृति संस्थान डी-48 गली न.-3दयालपुरम्, करावलनगरमार्ग:, दिल्ली -110094 संस्करणम् -2023

4. चन्द्रवंशदर्पणम्,विरचितः- परमपूज्यरामेश्वरगहिरागुरू,प्रकाशनम् - सनातन संत समाज आश्रम सामरबार: 1982
5. स्वर्णजयन्ती पीयूष पत्रिका, सम्पादक:- संजयदीक्षित, सनातनसंतसमाज: आश्रम सामरबार: पो० दुर्गापारा जशपुरम् (छ.ग.)
6. सूर्यवंशालोकः, लेखकः- मनोहरशास्त्रि, प्रकाशक:- सनातन संत समाज रायगढ मध्यप्रदेश: 1977
7. उरमालक्षत्रीवंशावली, लेखक:- अवधेशप्रसाद, प्रकाशक:- संतसमाज आश्रम श्रीकोट: 1982
8. श्रीमद्भागवद्गीता, गोविन्दभवनम्, कार्यालय: कोलकता का संस्थान, गीताप्रेस, गोरखपुरम् 273005
9. छत्तीसगढ का इतिहास, इतिहासकार:-डॉ राम कुमार बेहार, प्रकाशक:- डॉआर. के. बेहार प्रकाशन 370 सुन्दर नगर, रायपुर (छ.ग.), द्वितीयसंस्करणम्, जुलाई 2025 (पृष्ठक्रमाङ्क: 294-295)

**संदर्भ –**

1.वनां./ पृ.सं.91-92

2.अभि./पृ.स.12-13

3.तत्रैव12-13

4. चन्द्र./ पृ.सं.9

5. वनां./ पृ.सं.24-25

6.ब्रह्म./ श्लो.सं. 20

7. वनां./ पृ.सं.79

8. वनां./ पृ.सं.34-35

9. स्वर्ण./ पृ.सं.12-13

10. तत्रैव पृ.सं.13-14

11. अभि./पृ. सं.47-51

12. तत्रैव52-54

13. तत्रैव 52-54

14. श्रीमद्भा.गीता/ पृ.सं.31/3/35

15. अभि./पृ. सं.46